

# मनोविज्ञानस्य परिचयः

डॉ. बि. वेङ्कट लक्ष्मी नारायणः
सहायकाचार्यः, शिक्षाविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला


कस्यचित् देशस्य अथवा समाजस्य विकासे शिक्षकाणां महती भूमिका वर्तते। शिक्षकः ज्ञानेन साकं छात्राणां व्यवहारेऽपि वाञ्छितपरिवर्तनमानयति। तदर्थं पाण्डित्येन साकं बहूनि कौशलानि अपेक्षितानि भवन्ति। विद्यालयेषु शिक्षकः विभिन्नप्रकारकक्ष्यासु विभिन्नप्रकारच्छात्रान् पश्यति। तेषु समवयस्कानां छात्राणां मध्ये शारीरिकसामर्थ्यं, मानसिकसामर्थ्यं, प्रज्ञा, व्यक्तित्वम्, इच्छाः, अभिरुचयः इत्यादयः वैयक्तिकभेदान् द्रष्टुं शक्युमः।

तान् भेदान् अविगणय्य शिक्षकः कक्ष्याशिक्षणंकरोति तर्हि शिक्षाप्रक्रिया सुचारुरूपेण भवति। प्रक्रियायाः अस्याः आधाभूतः भवति अधिगमः (Learning)। तादृशाधिगमस्य समग्रवृत्तान्तः शिक्षकैः अवगन्तव्यः। शिक्षणप्रक्रिययां परिदृश्यमानानां समस्यानां दूरीकरणाय इदं मनोविज्ञानमत्यन्तं सहकरोति शिक्षकाय। यथा – तक्षकः द्वारादिनिर्माणाय काष्ठस्य समुचितपरिज्ञानं स्यात्। तथैव घटस्य निर्माणार्थमपि मृत्तिकायाः परिज्ञानं भवेत् कुलालस्य। तद्वद् छात्रेभ्यः अधिगमसम्प्रेषणाय शिक्षकस्यापि छात्राणां स्वभावादिपरिज्ञानं भवेत्।

अतः शिक्षकाः बालानां शारीरिक-मानसिकविकासः कथं भवति? अधिगमविकासयोः सम्बन्धः कः? अधिगमाय अनुकूलवातावरणं कथं निर्मातव्यम् ? छात्रैः सह शिक्षकस्य व्यवहारः, छात्रैषु परस्परं स्नेह? छात्राणां नियन्त्रणं कथं स्यात्? इत्यादिविषयान् ज्ञातुं मनोविज्ञानान्तर्गतस्य शिक्षामनोविज्ञानस्य अपेक्षा अतीव वर्तते।

# मनोविज्ञानस्य अर्थः

‘मनोविज्ञानम्’ इति पदम् आङ्ग्लभाषायां PSYCHOLOGY इति नाम्ना व्यवह्रियते। पदमिदम् ग्रीक्-भाषायाः Psyche, Logos इतिपदद्वयस्य संयोजनेन निष्पन्नम्।




मनोविज्ञानस्यास्य अर्थविषये बहवः विचाराः परिदृश्यन्ते। तेषु विचारेषु प्रधानतया चत्वारः प्रसिद्धाः सन्ति।

## ते यथा –

आत्मनः विज्ञानम् - मनोविज्ञानम्
(Psychology as a Science of Soul)

↓

मनसः विज्ञानम् - मनोविज्ञानम्
(Psychology as a Science of Mind)

↓

चैतन्यस्य विज्ञानम् - मनोविज्ञानम्
(Psychology as a Science of Consciousness)

↓

व्यवहारस्य विज्ञानम् - मनोविज्ञानम्
[Psychology as a Science of Behaviour]

1. आत्मनः विज्ञानम् – प्लेटो-अरिस्टाटिलादयः शास्त्रमिदं प्रत्यपादयन्। एतेषां मतानुसारम् आत्मनः अध्ययनं कर्तुं परिशीलनं कर्तुम् उद्दिष्टमिदं मनोविज्ञानमिति। परन्तु आत्मः स्वभावविषये अस्पष्टतां प्रदर्शयन्ति दार्शनिकाः। आत्मा मूर्तवस्तु नास्ति, इन्द्रियगोचरः नास्ति। तस्य आत्मनः स्वभावस्वरूपादिज्ञातुम् अशक्यत्वात् इदम् आत्मनः मनोविज्ञानमित्यर्थः कालन्तरे तिरस्कृता वर्तते।

1. मनसः विज्ञानं मनोविज्ञानम् इति द्वितीयः विचारः। अत्र मनसः अथवा मतिष्कस्य अध्ययनं क्रियते इति। परन्तु कालान्तरे मनसः अर्थस्य, प्रकृतेः, अस्तित्वस्यादीनां मापनं कर्तुम् अशक्यम् तथैव मनसः वैज्ञानिकमध्ययनं न सम्भवतीति मत्वा अर्थोऽयमपि तिरस्कृता।

3. चेतनायाः विज्ञानम् - आत्मानः मनसः च तिरस्कारणात् परं स्पेनदेशीयः विलियम जेम्सन् आदयः चैतन्यविचारकं शास्त्रमिति प्रत्यपादयन्। ते कथयन्ति मनोविज्ञानं चैतन्यस्य दशानां वर्णनं व्याख्यानं च करोतीति। अस्यैव चेतनायाः विज्ञानमित्यपि (Science of Consciousness) कथ्यते। मनसः चैतन्यावस्था, अचैतन्यावस्था इत्यवस्थाद्वयं वर्तते। तत्र अनयोः द्वयोः वर्णनं, व्याख्यानं च कर्तुं शक्यते इति तेषामभिप्रायः।

परन्तु कालान्तरे सिग्मण्ड फ्रायिड्-महोदयः मनसः अचेतनावस्थायाः विषये प्रत्यपादयत्। अचेतनावस्थायां विद्यामानाः भावाः, विचाराः, अनुभवाश्च व्यक्तित्वमधिकं प्रभावयन्तीति न्यरूपयत्। अतः अयमर्थोपि तिरस्कृता वर्तते।

4. व्यवहारस्य विज्ञानम् - जीवव्यवहारपरिशीलकं शास्त्रं मनोविज्ञानमिति विंशतिशताब्द्यां जे.बि.वाटसनमहोदयेन प्रतिपादितम्। जीवस्याभिव्यक्तिः क्रियासु भवति। एतासां क्रियाणां समुच्चयो व्यवहारपदेन व्यवह्रियते। व्यवहाराभिर्गमनेन, पठनेन, धावनेन, शयनादिक्रियया वा न भवति, प्रत्युत चिन्तनेनावबोधनेन कल्पनया वा भवति। व्यवहारस्याध्ययने मनसः सर्वाः क्रियाः भावाः सम्मिलिताः भवन्ति। अत्र प्राणिनां व्यवहारस्य अध्ययनाय शास्त्रमिदं प्रवृत्तम्। अत्र व्यवहारस्य प्रयोगार्हः, वस्तुनिष्ठः, परीक्ष्यः, माप्यः परिशीलनार्हश्च भवति। अतः अस्य शास्त्रस्य कृते इदानीं विज्ञानत्वं सिद्धं वर्तते इति प्रत्यपादयन्ति मनोवैज्ञानिकाः।

# मनोविज्ञानस्य परिभाषा:

1. मानवव्यवहारस्य विज्ञानं मनोविज्ञानम् – कोलेस्निकमहोदयः
2. मनोविज्ञानं व्यवहार-आचरणयोः यथार्थविज्ञानम् – मैक्गलमहोदयः।
3. मनोविज्ञानं व्यवहारस्य धनात्मकं विज्ञानं वर्तते। - वाट्सनमहोदयः
4. मानवव्यवहारस्य मानवीयसम्बन्धानां चाध्ययनम् वर्तते।- क्रो&क्रोवर्यौ
5. जीवपरिवेषयोः मध्ये परस्परसम्बन्धविश्लेषकं विज्ञानम् – वारेनवर्यः।
6. मानवानां स्वभावस्य विज्ञानम् – बोरिंगमहोदयः।
7. जीवनस्य विविधपरिस्थितिषु जीवस्य प्रतिक्रियाणाम् अध्ययनं करोति। जीवस्य सर्वाः प्रक्रियाः, समायोजनम्, कार्याणि, अभिव्यक्तः व्यवहारे अन्तर्भवन्ति।
8. व्यक्तिस्वीयपरिवेशस्यानुगुणं क्रियमाणकार्यकलापानामध्यनम्- वुडवत्वर्यः

# मनोविज्ञानस्य क्षेत्राणि (शाखाः)


## शास्त्रीयं मनोविज्ञानम्


- समान्यमनोविज्ञानम्
- प्रयोगात्मकमनोविज्ञानम्
- शरीरधर्ममनोविज्ञानम्
- अपसामान्यमनोविज्ञानम्
- समाजिकमनोविज्ञानम्
- शिशुमनोविज्ञानम्
- विकासमनोविज्ञानम्
- ज्ञानेन्द्रियातीतममनोविज्ञानम्


इत्यादयः

## अनुप्रयुक्तं मनोविज्ञानम्

- शिक्षामनोविज्ञानम्
- पारिश्रामिकमनोविज्ञानम्
- चिकित्सामनोविज्ञानम्
- स्वाथ्यमनोविज्ञानम्
- योगमनोविज्ञानम्


मनोविज्ञान का कार्यक्षेत्र
(Scope Psychology)
किशोर मनोविज्ञान
(Adolescent Psychology)
बाल मनोविज्ञान
(Child Psychology)
पशु मनोविज्ञान
(Animal Psychology)
मानव मनोविज्ञान
(Human Psychology)
असामान्य मनोविज्ञान
(Abnormal Psychology)
सामान्य मनोविज्ञान
(Normal Psychology)
अतीन्द्रिय मनोविज्ञान
(Para Psychology)
मनोमितिक मनोविज्ञान
(Psychometric Psychology)
शिक्षा मनोविज्ञान
(Educational Psychology)
व्यक्तित्व मनोविज्ञान
(Individual Psychology)
प्रयोगात्मक मनोविज्ञान
(Experimental Psychology)
विकासात्मक मनोविज्ञान
(Developmental Psychology)
सैन्य मनोविज्ञान
(Military Psychology)
व्यक्तित्व मनोविज्ञान
(Personality Psychology)
संज्ञानात्मक मनोविज्ञान
(Cognitive Psychology)
दैहिक मनोविज्ञान
(Physiological Psychology)
परामर्श मनोविज्ञान
(Counselling Psychology)
नैदानिक मनोविज्ञान
(Clinical Psychology)
समाजमनोविज्ञान
(Social Psychology)
औद्योगिक मनोविज्ञान
(Industrial Psychology)
प्रौढ़ मनोविज्ञान
(Adult Psychology)


मनोविज्ञान
राजनीति विज्ञान
शिक्षा
अर्थशास्त्र
दर्शनशास्त्र
संगीत एवं ललित कला
कंप्यूटर विज्ञान
विधि/अपराधशास्त्र
आयुर्विज्ञान/मनोरोगविज्ञान
जनसंचार
वास्तुकला एवं अभियांत्रिकी
समाजशास्त्र
© NCERT not to be republished


व्यवहारवादः
(Behaviouralism)
समग्रवादः
(Gestaltism)
प्रकार्यवादः
(Functionalism)
मनोविश्लेषणवादः
(Psho-Analism)
संरचनात्मकवादः
(Structuralism)
मनोविज्ञानस्य
वादाः
संज्ञानात्मकवादः
(Cognitivism)

1. संरचनावादः– डब्ल्यू वुण्ट

2. मनोविश्लेषणवादः– सिग्मण्ड फ्रॉयड

3. व्यवहारवादः– जे.बि. वाट्सन्

4. प्रकार्यवादः – विलियम जेम्स

5. समग्रवादः – वरथीमर, कोफ्का, कोह्लर

6. संज्ञानात्मकवादः – उलिक् नाइजर